इति हारावली । १८७ ॥ अस्य गुणाः । गुरुत्वम् । ग्राहित्वम् । मधुरत्वम् । बलवर्द्धनत्वम् । मेदःपित्तास्रनाशित्वम् । हृद्यत्वम् । रोचनत्वम् । कफवातकारित्वञ्च । इति राजवल्लभः ॥ (जलपानविधौ भक्षणनिषेधोऽस्य यथा,—
"प्रातः पानीयपाने मधुकृद्भिगदितं द्वयमेतच्च नाद्यात् ।
मांसं चीरञ्च शाकं सकलविदलकं पिष्टकं चिङ्गटञ्च ॥"
इति वैद्यक-ऋतुचर्य्यायाम् ॥)

चिङ्गटी, स्त्री, (चिङ्गट+जातौ ङीष् ।) मत्स्यविशेषः । घुषाचिङ्गड़ी इति भाषा ॥ अस्या गुणाः । मधुरत्वम् । हृद्यत्वम् । वातनाशित्वम् । श्लेष्मकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

चिङ्गड़ः, पुं, (चिङ्गट+पृषोदरादित्वात् टस्य डत्वे साधुः ।) चिङ्गटमत्स्यः । इति शब्दमाला ॥ (विवरणमस्य चिङ्गटशब्दे ज्ञातव्यम् ॥)

चिचिण्डः, पुं, फलविशेषः । चिचिण्डा इति चिचिङ्गा इति च भाषा ॥ तत्पर्य्यायः । श्वेतराजिः २ सुदीर्घः ३ गृहकूलकः ४ । अस्य गुणाः । वातपित्तनाशित्वम् । पथ्यत्वम् । बलरुचिकारित्वम् । शोषिणोऽतिहितत्वम् । पटोलतः किञ्चिद्गुणहीनत्वञ्च । इति भावप्रकाशः ॥ (यथा च हारीते प्रथमे स्थाने दशमेऽध्याये ।
"चिचिण्डो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः ।
शोषिणोऽतिहितः किञ्चिद्गुणैर्न्यूनः पटोलतः ॥")

चिञ्चा, स्त्री, (चिं चयनं चिनोतीति । चि+अन्येभ्योऽपीति डः ।) तिन्तिड़ीवृक्षः । इत्यमरः । २ । ४ । ४३ ॥ (यथा,—
"चिञ्चादलरसस्वादु पथ्यं दध्योदनं हितम् ॥"
इति वैद्यकभैषज्यधन्वन्तरियज्ञे गुल्माधिकारे ॥)

चिञ्ची, स्त्री, (चिञ्च+गौरादित्वात् ङीष् ।) गुञ्जा । इति केचित् ॥

चिञ्चाम्लं, क्ली, (चिञ्चा तिन्तिड़ी तद्वत् अम्लं यत्र ।) अम्लशाकः । इति राजनिर्घण्टः ॥

चिञ्चासारः, पुं, (चिञ्चायास्तिन्तिड्याः सार इव सारोऽम्लं यत्र ।) अम्लशाकः । इति राजनिर्घण्टः ॥

चिञ्चोटकः, पुं, (चिञ्चेव अटतीति । अट+ण्वुल् । पृषोदरात् साधुः ।) तृणविशेषः । चेँचको इति चेँचड़ा इति च भाषा ॥ तत्पर्य्यायः । अङ्कलोद्यः २ । इति रत्नमाला ॥ चिञ्चाटकोऽपि पाठः ॥

चिट, प्रेषे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चेटति भृत्यं स्वामी । इति दुर्गादासः ॥

चिट, क प्रेषे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ॥)

चित, ई ज्ञाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ई, चित्तः । ज्ञानमिह जागरणम् । ज्ञानञ्च अविद्यानिद्रयाक्रान्ते जगत्येकः स चेततीति हलायुधः । चिचेत रामस्तत् कृच्छ्रम् । इति दुर्गादासः ॥

चित, इ क स्मृतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इ क, चिन्तयति विद्यां सुधीः । इति दुर्गादासः ॥

चित, क ङ ज्ञाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) क ङ, चेतयते । राक्षसस्य चेतयन्ति न । इति भट्टौ गणकृतानित्यत्वमिति रमानाथः । वस्तुतस्तु चेतयते ततश्चेतं करोतीति णौ साध्यम् । इति दुर्गादासः ॥

चित्, स्त्री, (चित् संज्ञाने+सम्पदादित्वात् भावे क्विप् ।) ज्ञानम् । इत्यमरः । १ । ५ । १ ॥ (यथा, भागवते । ३ । ७ । २ ।
"ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः ।
लीलया चापि युज्येरन् निर्गुणस्य गुणाः क्रियाः ॥")


चित्, व्य, असाकल्यम् । इत्यमरः ॥ यथा । किञ्चित् कश्चित् इत्यादि ॥ (तत्तु प्रत्ययविशेषः । कालाद्यनिर्णये चित्प्रत्ययस्य प्रयोगो दृश्यते । "किमः क्वान्ताच्चिचनौ ।" इति मुग्धबोधव्याकरणप्रणेता पूज्यपादवोपदेवाचार्य्यः ॥ )

चितः, त्रि, (चि+कर्म्मणि क्तः ।) छन्नः । इति मेदिनी । ते, १८ ॥ (कृतचयनः । सञ्चितः । "इह वै कर्म्मचितो लोकः चीयते एवममुत्र पुण्यचितः चीयते ।" इति श्रुतिः ॥)

चिता, स्त्री, (चीयते श्मशानाग्निरस्यां यद्वा चीयते उच्चीयतेऽसौ प्रेतस्य परलोकप्राप्तये इति । चि+अधिकरणे वा कर्म्मणि क्तस्ततष्टाप् ।) शवदाहाधारचुल्ली । तत्पर्य्यायः । चित्या २ । इत्यमरः । २ । ८ । ११७ ॥ काष्ठमठी ३ चैत्यम् ४ चिताचूड़कम् ५ चित्यम् ६ । इति त्रिकाण्डशेषः ॥ चितिः ७ । (यथा, महाभारते । ३ । २१६ । १७ ।
"चितायेरुद्वहन्नाग्न्यं पचाभ्यां तत् प्रवर्त्तते ॥")
संहतिः । इति मेदिनी । ते, १८ ॥

चिताचूड़कं, क्ली, (चितेव चूड़कम् ।) चिता । इति त्रिकाण्डशेषः ॥

चितिः, स्त्री, (चीयतेऽस्यामग्निरिति । चि+अधिकरणे क्तिः ।) चिता । (यथा, भागवते । ४।२८।५० ।
"चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम् ॥")
समूहः । इति मेदिनी । ते, १८ ॥ दुर्गा । यथा,
"चितिश्चैतन्यभावाद्वा चेतना वा चितिः स्मृता ।
महान् वाप्य स्थिता सर्व्वं महा वा प्रकृतिर्म्मता ॥"
इति देवीपुराणे ४५ अध्यायः ॥ * ॥
भित्तिस्थेष्टिकादिसञ्चयात्मकपदार्थाङ्कविशेषः । यथा, चितौ करणसूत्रं सार्द्धवृत्तम् ।
"उच्छ्रयेण गुणितं चितेः किल
चेत्रसम्भवफलं घनं भवेत् ।
इष्टिकाघनहृते घने चिते-
रिष्टिकापरिमितिश्च लभ्यते ॥
इष्टकोच्छ्रयहृदुच्छ्रितिश्चितेः
स्युः स्तराश्च दृषदां चितेरपि ॥
उदाहरणम् ।
अष्टादशाङ्गुलं दैर्घ्यं विस्तारो द्वादशाङ्गुलः ।
उच्छ्रितिस्त्र्यङ्गुला यस्यामिष्टिकास्ताश्चितौ किल ॥
यद्विस्तृतिः पञ्चकराष्टहस्तं
दैर्घ्यञ्च यस्यां त्रिकरोच्छ्रितिश्च ।
तस्यां चितौ किं फलमिष्टिकानां
सङ्ख्या च का ब्रूहि कति स्तराश्च ॥




इष्टिकायाः घनहस्तमानम् $\frac{३}{६४}$ चितेः चेत्रफलम् ४० । उच्छ्रयेण गुणितं चितेर्घनफलम् १२० । लब्धा इष्टिकासङ्ख्या २५६० । स्तरसङ्ख्या २४ । एवं पाषाणचयेऽपि । इति चितिव्यवहारः ॥" इति लीलावती ॥ (इष्टाङ्गविशेषः । यथा, मार्कण्डेये । २२ । ६ ।
"चितयस्तत्र कर्त्तव्या नान्तरिक्षगता यतः ॥")

चितिका, स्त्री, (चितिः काञ्चीभेदः सा इव कायतीति । कै+कः ।) कटिशृङ्खला । इति हारावली । २२४ ॥

चित्तं, क्ली, (चेतत्यनेनेति । चित्+करणे क्तः ।) अनुसन्धानात्मिकान्तःकरणवृत्तिः । इति वेदान्तः ॥
"यत्तत् सत्वगुणं स्वच्छं शान्तं भगवतः पदम् ।
यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥
स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः ।
वृत्तिलक्षणं प्रोक्तं यथापां प्रकृतिः परा ॥"
इति श्रीभागवतम् ॥
अस्यार्थः । "अधिभूतस्वरूपेण तस्यैव महानितिसंज्ञा अध्यात्मरूपेण चित्तं उपास्यरूपेण वासुदेवः अधिष्ठाता तु तस्य चेत्रज्ञः ।" इति श्रीधरस्वामी ॥ (अनेनैव चिच्छक्तेः प्रथमसम्बन्धः । अतएव भगवत्पतञ्जलिपादैरुपदिष्टं प्रथमसूत्रे "योगश्चित्तवृत्तिनिरोधः ।" तथा च मुण्डकोपनिषदि । ३ । १ । ६ ।
"एषोऽणुरात्मा चेतसा वेदितव्यो
यस्मिन् प्राणः पञ्चधा संविवेश ।
प्राणैश्चित्तं सर्व्वमोतं प्रजानां
यस्मिन् विशुद्धे विभवत्येष आत्मा ॥")
मनः । इत्यमरः । १ । ४ । ३१ ॥

चित्तप्रसन्नता, स्त्री, (चित्तस्य प्रसन्नता प्रसादः ।) हर्षः । इति हेमचन्द्रः । २ । २२६ ॥

चित्तविप्लवः, पुं, (चित्तस्य विप्लवो विपर्य्ययः ।) उन्मादः । इति हेमचन्द्रः । २ । २३४ ॥

चित्तविभ्रमः, पुं, (चित्तस्य विभ्रमः भ्रान्तिः ।) उन्मादः । इत्यमरः । १ । ७ । २६ ॥ (उन्मादशब्दे विवृतिरस्य ज्ञेया ॥)

चित्तसमुन्नतिः, (चित्तस्य समुन्नतिः समुन्नयनं उत्तेजनमिति यावत् ।) मानः । इत्यमरः । १ । ७ । २२ ॥